श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे सप्तमोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे सप्तमोऽध्यायः ॥

श्रीशुक उवाच
भरतस्तु महाभागवतो यदा भगवतावनितल -
परिपालनाय सञ्चिन्तितस्तदनुशासनपरः
पञ्चजनीं विश्वरूपदुहितरमुपयेमे ॥ 1 ॥

तस्यामु ह वा आत्मजान् कार्त्स्न्येनानुरूपा -
नात्मनः पञ्च जनयामास भूतादिरिव
भूतसूक्ष्माणि सुमतिं राष्ट्रभृतं
सुदर्शनमावरणं धूम्रकेतुमिति ॥ 2 ॥

अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य
व्यपदिशन्ति ॥ 3 ॥

स बहुविन्महीपतिः पितृपितामहवदुरुवत्सलतया
स्वे स्वे कर्मणि वर्तमानाः प्रजाः स्वधर्ममनु -
वर्तमानः पर्यपालयत् ॥ 4 ॥

ईजे च भगवन्तं यज्ञक्रतुरूपं क्रतुभिरुच्चावचैः
श्रद्धयाऽऽहृताग्निहोत्रदर्शपूर्णमास -
चातुर्मास्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनं
चातुर्होत्रविधिना ॥ 5 ॥

सम्प्रचरत्सु नानायागेषु विरचिताङ्गक्रियेष्वपूर्वं
यत्तत्क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे
सर्वदेवतालिङ्गानां मन्त्राणामर्थनियामकतया
साक्षात्कर्तरि परदेवतायां भगवति वासुदेव एव
भावयमान आत्मनैपुण्यमृदितकषायो
हविःष्वध्वर्युभिर्गृह्यमाणेषु स यजमानो
यज्ञभाजो देवांस्तान् पुरुषावयवेष्वभ्य -
ध्यायत् ॥ **6** ॥

एवं कर्मविशुद्ध्या विशुद्धसत्त्वस्यान्तर्हृदया -
काशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुष -
रूपो पलक्षणे श्रीवत्सकौस्तुभवनमालादरगदादिभि -
रुपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरुषरूपेण
विरोचमान उच्चैस्तरां भक्तिमनुदिनमेधमान -
रजयाजायत ॥ **7** ॥

एवं वर्षायुतसहस्रपर्यन्तावसितकर्मनिर्वाणा -
वसरोऽधिभुज्यमानं स्वतनयेभ्यो रिक्थं
पितृपैतामहं यथादायं विभज्य स्वयं सकल -
सम्पन्निकेतात्पुलहाश्रमं प्रवव्राज ॥ **8** ॥

यत्र ह वाव भगवान् हरिरद्यापि तत्रत्यानां
निजजनानां वात्सल्येन सन्निधाप्यत इच्छारूपेण ॥ **9** ॥

यत्राश्रमपदान्युभयतो नाभिभिर्दृषच्चक्रैश्चक्रनदी
नाम सरित्प्रवरा सर्वतः पवित्रीकरोति ॥ **10** ॥

तस्मिन् वाव किल स एकलः पुलहाश्रमोपवने
विविधकुसुमकिसलयतुलसिकाम्बुभिः कन्दमूल -

फलोपहारैश्च समीहमानो भगवत आराधनं विविक्त
उपरतविषयाभिलाष उपभृतोपशमः परां
निर्वृतिमवाप ॥ **11** ॥

तयेत्थमविरतपुरुषपरिचर्यया भगवति प्रवर्धमाना -
नुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगे -
नात्मन्युद्भिद्यमानरोमपुलककुलकौत्कण्ठ्य -
प्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं
निजरमणारुणचरणारविन्दानुध्यान -
परिचितभक्तियोगेन परिप्लुतपरमाह्लादगम्भीरहृदय -
हृदावगाढधिषणस्तामपि क्रियमाणां
भगवत्सपर्यां न सस्मार ॥ **12** ॥

इत्थं धृतभगवद्व्रत ऐणेयाजिनवाससानुसव -
नाभिषेकार्द्रकपिशकुटिलजटाकलापेन च विरोचमानः
सूर्यर्चा भगवन्तं हिरण्मयं पुरुषमुज्जिहाने
सूर्यमण्डलेऽभ्युपतिष्ठन्नेतदु होवाच — ॥ **13** ॥

परोरजः सवितुर्जातवेदो
    देवस्य भर्गो मनसेदं जजान।
सुरेतसादः पुनराविश्य चष्टे
    हंसं गृध्राणं नृषद्रिङ्गिरामिमः ॥ **14** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे भरतचरिते भगवत्परिचर्यायां सप्तमोऽध्यायः ॥